RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.:
4-5, 19-20 of Every Month

॥ ओ३म् ॥
अतीतानागते चोभे पितृवंशं
च भारत!।
तारयेद् वृक्षरोपी च
तस्माद् वृक्षांश्च रोपयेत् ॥
( महाभारत अनुशासनपर्व 58/26 )

‘अम्बितमे नदीतमे देवितमे सरस्वती,
अप्रशस्ता इव स्मसि
प्रशस्तिमम्ब नस्कृधि॥
( ऋग्वेद, २.४१.६ )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥
या कुन्देन्दुतुषारहारधवला या
शुभ्रवस्त्रावृता।
या वीणावरदण्डमण्डितकरा
या श्वेतपद्मासना॥
या ब्रह्माच्युत शंकरप्रभृतिभिर्देवैः
सदा वन्दिता।
सा माम् पातु सरस्वती
भगवती निःशेषजाड्यापहा॥
– श्रीसरस्वतीध्यानम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट: www.sanskritsamvad.com मूल्यम्-रू. १०/-

卐 वर्षम्-१३ 卐 अंक:-१७ ( ३०५ ) नवदेहली 卐 १ मार्चमास: २०२४त: १५ मार्चमास: २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## प्रधानमंत्रीनरेंद्रमोदी द्वारा केंद्रीयसंस्कृतविश्वविद्यालयस्य रघुनाथकीर्तिपरिसरस्य देवप्रयागस्य उद्घाटनं जातम्

देवप्रयाग: (डॉ वीरेंद्रसिंहबर्त्वाल:) वर्तमान भारतस्य प्रधानमंत्री नरेंद्र मोदी आभाषिकमाध्यमेन जातम्। ऐषम: त्रयोदश: परिसर: वर्तते । योगगुरु बाबारामदेव: ,विश्वविद्यालयस्यकुलपति: प्रो. श्रीनिवासवरखेड़ी, पौड़ीलोकसभासांसद: पूर्व मुख्यमंत्री तीरथसिंहरावत:, देवप्रयाग क्षेत्रे विधायक: विनोदकंडारी, पौड़ीविधायक राजकुमारपोरी च उपस्थिता: आसन्। नरेंद्रमोदी कथितवान् यत् संस्कृतशिक्षा अधुना आजीविका दृढ माध्यमं वर्तते। कुलपति: श्रीनिवास वरखेड़ी कथितवान् अस्मिन् वर्षे केंद्रीयसंस्कृतविश्वविद्यालये सार्धद्विशतम् अध्यापकानां स्थायी



नियुक्तयो भविष्यन्ति। परिसरस्य त्रिभाषीयअर्द्धवार्षिकपत्रिका ‘देवभूमि सौरभम्’ साहित्य विभागस्य च पत्रिका ‘काव्यलक्षणविमर्श’ इत्यनयो: विमोचनं जातम् ।

बाबारामदेवेन कथितं संस्कृतक्षेत्रे आजीविकावसराणाम् असीम संभावना:। तत्र योगदानं दातुं पतंजलिसंस्थान संस्कृतस्य छात्रा: शतप्रतिशतं सक्षमा:। अवसरे अस्मिन् तीरथसिंहरावत: विनोदकंडारी च जनान् संबोधितवान् । परिसरस्य निदेशक: प्रो. पीवीबी सुब्रह्मण्यम् सर्वेभ्य: धन्यवादं ज्ञापितवान्।




## शोधाधारितं ‘स्व’ आधारित सत्यं च समक्षम् आनेष्यति देवभाषा विश्वविद्यालय: – डॉ कृष्णगोपाल:

वाराणसी। भारतस्य भारतीयता तत् संस्कृतौ एव इत्येषो विचार: सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य योगसाधना केंद्रे विद्वत विचार मंथन कार्यक्रमे, राष्ट्रियस्वंयसेवकसंघस्य सह सरकार्यवाह: डॉ कृष्ण



गोपाल: मुख्यातिथित्वेन व्यक्तीकृतवान्। तत: पूर्व सह सरकार्यवाह: सरस्वतीभवनपुस्तकालये संरक्षित दुर्लभ पांडुलिपिभ्यो राष्ट्रियपांडुलिपि मिशन द्वारा संरक्षणगत कार्याणि प्रचलन्ति। अध्यक्षय उद्बोधने कुलपति: प्रो बिहारीलालशर्मा कथितवान् यत् संस्कृत भाषा मुख्यतया व्यष्टित: समष्टिं यावज्जनं योजयति। प्रत्येकस्यां प्रार्थनायां विश्व बंधुत्व भावना व्याप्ता वर्तते।संस्थेयं भारतीय विद्यानां संवर्धनाय-संरक्षणाय प्रतिबद्धा अस्ति।प्रारम्भे स्वपरंपराणाम् आलोके कुलपति: प्रो बिहारीलालशर्मा मुख्य अतिथे डॉ कृष्णगोपालस्य पुष्पगुच्छेन स्वागतम् अभिनंदनं च कृतवान्।

## 2022 विश्वभारतीपुरस्काराय चिता: महामहोपाध्याया: आचार्या रहसबिहारिद्विवेदिन:

वार्ताहर: -अरविन्दतिवारी

विश्वभारतीपुरस्कार- सम्मानिता महामहोपाध्याया आचार्यरहसबिहारी द्विवेदिन: संस्कृतसाहित्यस्य सत्यसमीक्षका: सन्ति, किन्तु



संस्कृतगीतकाव्यादिरचनेऽपि दक्षा इमे निरन्तरं स्वविषयानुकूलसर्जनया सहृदयान् विमोहयन्ति। अनेकानि विशिष्टानि पुस्तकानि एभी रचिता

शेषभाग:पंचमपुटे

# सम्पादकीयम्

## कर्मफलस्य अनिवार्यता, प्रायश्चितस्य च प्रक्रिया

कमर्णः फलमनिवार्य विद्यते। समस्तजगतः व्यवस्था कर्मफलाधारेणैव तिष्ठति । यादृशं कुरुते कर्म तादृशं फलमश्नुते इति श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन कथितम्। ईश्वरः सम्यक् न्यायकर्तारूपेण वर्तते। न्यायस्य इदमेव तात्पर्य वर्तते यत् दुष्टानां कृते सम्यक् दण्डविधानं स्यात् कश्चित्। पूजनाचर्नवन्दनकर्तृणां च कृते तेषां दुष्कर्माणां फलस्वरूपं दण्डविधानं न्यूनता अल्पता वा स्यादिति कथं न्यायं संगतम्। तादृशानां कुटिलानां कृते दण्डविधाने पक्षपातं न स्यादिति। भ्रातृणां कृते मित्राणां वा कृतै अधिकारिणामेतदेव पक्षपातो दृश्यते। ईश्वरेणापि चेत् एवमेव क्रियते तदा न्यायस्य अस्तित्वमेव किं भविष्यति।

पापकर्मणां परिहारस्योपायं कृत्वा तस्य दण्डविधानात् आत्मानं परिरक्षणार्थमुपायं कुर्वन्ति तेषां कृते सम्यकं मार्गः प्रायश्चितमेव वर्तते। स्वेच्छापूर्वकं तस्य दण्डग्रहणं कृत्वा अस्मिन् एव जीवने पापकर्मणां प्रायश्चितं करणीयम्। अनेन च प्रायश्चितकर्मणा आत्मनः शुद्धिर्भवति। मनसः सन्तापं विनश्यति। चित्तस्य निर्मलता जायते । अन्तःकरणं शान्तं भवति । समाजे अपि पुनः प्रतिष्ठा प्राप्यते। विगतं च विश्वासः सम्मानं च पुनरायाति। न्यायालये यदि कश्चिद् स्वयमेव पापानां कृते स्वेच्छथा स्वीकरणं करोति तदेव तस्य प्रायश्चितस्य मार्ग प्रशस्तं भवति। एषा एव प्रायश्चितस्य प्रक्रिया।

### ॥ वेद वाणी ॥

'स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥'

'O! Young God Agni! The man who invokes Lord Agni that guides and inspires one in the best of ways, knows and gains His Grace and favour. The Lord makes all his days prosperous and good. He grants him wealth of cattle and priceless treasures..He shines upon his dwelling and looks after his well-being.'

The Rig Veda 4.4.6

'सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥'

'What ever path we may take in life, let it be always simple, straight and free of thorns. May our food, ghee and other such items be sweet and fit for consumption. O !Lord Agni, God of Fire, You are our Guide and friend. May our fortune never be impaired. On the other hand, may You bless us with a dwelling full of ample riches and food.'

The Rig Veda 3.54.21

'आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥
नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम् ॥
वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥'

'O! Lord Indra! May the strength- enhancing might and power of yours come to us from the West, North, South and East. Let the same reach us from all quarters. May You confer upon us radiant wealth.""We enjoy the privilege of wealth associated with valour, along with famed and great means of protection from You. You are the Lord of wealth and prosperity here and hereafter. You may be kind enough to confer upon us the best of prosperity.""O! Widely acclaimed Lord Indra! Through good deeds,worship and friendship with You, we may vanquish both internal and external enemies of ours. May we establish our continuous superiority over them. May we, under Your protection, remain happy with abundant wealth bestowed on us by You."

The Rig Veda 6.19.9/10/13

संकलन : एस.वासुदेव रावः

# सवाईजयसिंहस्यजयपुरवेधशालाया



-श्रीमती अंजना शर्मा (ज्योतिष दर्शनाचार्य)
(शंकरपुरस्कारभाजिता) पुरातत्वविद्,
अभिलेख व लिपि विशेषज्ञ प्रबन्धक देवस्थान विभाग, जयपुर
राजस्थान सरकार

व्यधो वेधश्चेमौ समानार्थकौ शब्दौ कोशे विद्यते । व्यध् ताडने इत्यस्माद् अप् प्रत्यये व्यध इति-विध् विधाने इत्यतश्च घञ् प्रत्यये वेध इति निष्पद्यते । यष्टिशलाका नलिकाभिराकाशस्थनक्षत्राणामवलोकनं वेधो भवति । अयञ्च वेधो धातुप्रस्तरादिनिमितैर्यन्त्रैर्भवति । वेदेषु सप्तविशंतिनक्षत्राणां ग्रहाणामुल्काकेतूनां धूमकेतूनाञ्च वर्णनमनेकेषु स्थलेषु प्राप्यते । अथर्व- ज्यौतिषे सप्ताङ्ग लशङ्क द्वारा वेधप्रक्रिया वर्णिता विद्यते । महाभारते केतु-धूमकेतु-ग्रहणानाञ्च वर्णनमुपलभ्यते। नक्षत्रनामभिर्द्वादशानां मासानां संज्ञा विद्यते। नक्षत्रसंज्ञासंज्ञिता मासा इति। यथा चित्रा नक्षत्रेण युक्ता पौर्णमासी यस्मिन् मासि संभवति स चौत्रों मासः। विशाखा नक्षत्रेण युक्ता पौर्णमासी यस्मिन् मासि स भवति वैशाखमासः। अन्येषु मासेष्वष्वेवमेव बोध्यम्।

आकाशस्थितग्रहनक्षत्राणां विभिन्नस्थितिविज्ञानाय करणग्रन्थेषु प्रतिपादितगणितप्रक्रियायाः ग्रहनक्षत्रसम्बन्धिसम्पादितगणितानां च सूक्ष्मतां प्रत्येतु यन्त्रवेधो नितरामावश्यको वरीरवर्ति। अन्येनोपायेन ग्रहाणां नक्षत्राणाञ्च याथातथ्येन विभिन्न स्थितिविज्ञानं नैव भवति। अतो गणितं प्रमाणयितु वेधशालाया निर्माण मतिप्राचीनेऽपि काले अवर्तिष्ट। वेधशालायाः साक्षात्प्रयोजनं गणितपरीक्षणमिति तात्पर्यम्। 'सिद्धान्तशिरोमणी' गोलबन्धाधिकारे यन्त्राध्याये च अनेकेषु वर्णितेषु यन्त्रेषु नवयन्त्राणि प्रमुखानि विद्यन्ते-

(१) चक्रयन्त्रम् (२) चापयन्त्रम्
(३) तुर्यगोलयन्त्रम् (४) नाडीवलययन्त्रम्
(५) गोलयन्त्रम् (६) घटिकायन्त्रम्
(७) शङ्कः यन्त्रम् (८) फलकयन्त्रम्
(६) षष्टियन्त्रम् । इति

एभिर्यन्त्रैः खेस्थानां ग्रहनक्षत्रादीनां पदार्थानां यज्ज्ञानं विज्ञायते तदेवा- विकलं सम्यग् जयपुरवेधशालायां स्वरूपान्तरितैः आकृतिभेदैर्विर्निमितैर्यन्त्रैः खगोलीयपदार्थाः ग्रहनक्षत्रस्थितिश्च बोध्यन्ते । १७२० खीष्टाब्दात् १७४८ खीष्ताब्दं यावच्छासनं कुर्वता दिल्लीनरेशेन मुहम्मदशाहमहोदयेन सवाई जयसहो द्वितीयो जयपुरस्थः समादिष्टः सूक्ष्मवेधोपयोगियन्त्राणि निर्मापयितुम् । हियार्कस, टालमी, युक्लिड, जयशेह कासी, नसीरतुसी, सैयदगुरगणी खपानी अकबरशाही प्रभृतिद्वारा चर्चितवेधप्रक्रियासु स्थूलतां वीक्ष्य समादिष्टो महाराजसवाईजर्यासहो द्वितीयः समरकन्दस्थित मिर्जा उलुगवेग-निर्मितानुरूपाणि सूक्ष्मातिसूक्ष्मरूपेण वेधशालायन्त्राणि निर्मितवान् प्रथमतो दिल्लीनगरे । तत्र निर्माणे अत्रत्या वैदेशिकाश्च विद्वान्सः परामृशन् । तदनन्तरं श्रीमान्सवाईजयसिंहद्वितीयो जयपुरोज्जयनीमथुरावाराणसीषु नगरीषु वेध- शालायन्त्राणि निरमापयत। तासु वेधशालासु जयपुरीया वेधशाला सर्वोत्तमेति निश्चप्रचम् । इयं वेधशाला १७२८ खोष्टाब्दे निर्मिता विद्यते ।

तदनन्तरं १९०१ खीष्टाब्दे तत्सामयिको नरेशः चूर्णप्रस्तरनिर्मितां वेधशालां ष्सङ्गमर्मर ष्प्रस्तरैः निर्मातुम् आदेशं ददौ। अस्मिन् वेध शाला- जीर्णोद्धारकर्मणि पण्डितप्रकाण्डस्य चंद्रधरगुलेरिमहोदयस्य विद्वद्वरेण्यस्य श्री गोकुलचन्द्रभावनजी महोदयस्य, श्रीमतो गैरटमहोदयस्यच स्तुत्यं योगदानमासीत् । १९०१ तमे वर्षे श्रीमान् चन्द्रधरगुलेरिमहोदयः ष्सम्राासिद्धान्तःष इति नाम्नः सिद्धान्तग्रन्थरत्नस्याङ्गलभाषायामनुवादं विधाय स्वस्य विद्वत्तायाः परिचयं ज्यौतिषशास्त्रस्य प्रगाढपाण्डित्यञ्च प्रकाशयामास । यन्त्रनिर्माणे कीदृशं तस्य खगोलीयज्ञानमित्यपि नाऽस्ति तिरोहितम् । ऊनविंशतिवर्षवयस्कोऽयं जयपुरीय ज्यौतिषयंत्रशालाया यंत्राणां जीर्णोद्धारसमये तेषां शास्त्रानुसारं मानकरणे, संवीक्षाकरणे चाभूतपूर्व योगदानमदात् । जयपुरस्य वेधशालायां दिगंशकपाली-जयप्रकाशसम्राट्नाडीवलयक्रान्तिवृत्तषष्ठांशद्वादशराशिवलयनामकानि यन्त्राणि निर्मितानि सन्ति । तत्र समेषां यन्त्राणां वर्णनं विस्तरभयान्न दीयतेऽत्र । केवलमत्र वृत्तषष्ठांशक्रान्तिवृत्तयोः निर्माणप्रकारो लिख्यते । अत्राऽपि विद्वद्धौरेयस्य श्रीचन्द्रधरनुल्लेरिमहोदयस्य गणित-विषयकं गभीरतमं विज्ञानं परिलक्ष्यते । तद्यथा -अथ क्रान्तिवृत्तं नाम यन्त्रमुच्यते

पराल्पद्युज्या प्रमाणेनैकं लोहमयं वृत्तं कार्यम् । तत्पूर्वापरयाम्योत्तर चतुरंगुलायाम-यन्त्रयुतं कार्यम् । पुनस्त्रिज्या परिमितव्यासार्द्धेनपत्राकारवृत्तं पित्तलस्य कार्यम् । तद्वृत्तं पाषाणादिघर्षणेन समीककृतं श्लक्ष्णं कार्यम् । तच्चतुःसूत्राङ्कितं भांशाङ्कितं कार्यम् । तदेकपालिर्लोहद्युज्यावृत्ते कीलितः कार्यः । ऊर्ध्वाधरसूत्रं कीलस्थाने लगति तथा कीलितः कार्यः । अधःसूत्रं द्युज्यावृत्ताद्विगुणपरम् क्रान्तिज्यान्तरितं यथा भवति तथा कीलाधारेण युतं कार्यम् । एवमुभयपार्श्वेऽपि कीलाभ्यां दृढं धारितं कार्यम् । पुनरायनपट्टिकायां समानान्तरं पलभाक्षेत्रद्वयं लोहादिनिर्मितं कृत्वा स्थाप्यम् । तत्कर्णपट्टयोस्तिर्यग् लोहपट्टिका दृढा स्थाप्या । तदुपरिमध्ये छिद्रं कृत्वा किञ्चित्पराल्पधुन्याधिकं पत्राकारं वृत्तं कीलितं कार्यम् । तस्मिन्यन्त्रे पराल्पद्युज्या वृत्तं कार्यम् । तस्मिन् षष्टिघटिका भांशाश्चाङ्कनीयाः । तस्मिन्मध्ये चतुरंगुलाधिकं दृढं कीलं कृत्वा पूर्वकृतं कान्तिवृत्तं चतुः सूत्रसंपातकृतच्छिद्रे प्रोतं कार्यम् । यथा भ्रममाणं भवति तथा कार्यम् । ऊर्ध्वसूत्रे क्रान्तिवृत्ते मकरस्य चिह्न कार्यम्, अधः सूत्रे कर्कचिह्न कार्यम् । पार्श्वयोर्मेषतुलाचिह्न कार्ये। क्रान्तिवृत्तकेन्द्रे सूक्ष्मं चिह्न कृत्वा वृत्तव्यासात् किञ्चिदधिका लोहपट्टिका वेधार्थ कार्या । तदेकतरप्रान्तस्तु क्रान्तिवृत्तपालिकृताङ्केषु यथा भ्रमति तथा विध ेयः । द्वितीय प्रान्ते वृत्ततुरीयं पट्टीसंलग्नकेन्द्र यथा भवति तथा स्थापनीयम् । तुरीयपालौ नवत्यंशाश्चाङ्कनीयाः तत्केन्द्रे नलिकायुतपट्टिका कीलेन प्रोता कार्या । यथा तदग्रं तुरीयवृत्तपालिकास्थांशेषु भ्रमति तथा कार्यम् । यन्त्रान्तरान्मकरास्यनतघटिका वेधसमये ज्ञेयाः । स्वगतघटीषु मकारास्यं स्थापयित्वा तुरीयकेन्द्रगतनलिकया ग्रहर्क्षादिकं वेधयेत् । तुरीये यावन्तोंशाः बृहत्पट्टिकातो भवन्ति ते शरांशा ज्ञेयाः । बृहत्पट्टिकायाः सूक्ष्माग्रं यत्र लगति तत्र राश्यादिकं तत्षड्राशियुतं ध्रुवको भवति । अथ दक्षिणगोलस्थ ग्रहर्क्षवे- धार्थं तुरीयकेन्द्रं पट्टिकातस्तुरीयत्रिज्यान्तरे कार्यम्, तुरीयपालिस्तु पट्टिका संलग्ना कार्या । अस्माभिरिदं यन्त्रं कर्मकारहस्तव्यासमितं कृतमस्ति । इति क्रान्तिवृत्तं यन्त्रम् ।

अथवृत्तषष्ठांशयन्त्रमुच्यते-जलसमीकृतायां भूमौ दिक् साधनं कृत्वा याम्योत्तराः भित्तिः पूर्ववत् समकोणसमचतुर्भुजा कार्या। तस्माद्दक्षिणतः किंचित्प्रदेशं त्यक्त्वा ऊर्ध्वाधरा रेखा कार्या। ऊर्ध्वपालौ याम्योत्तरा तत्समा रेखा कार्या। तद्योगे केन्द्रं कृत्वा किंचि- दधिकचतुर्थांशमितं वृत्तं कार्यम् । तद्वृत्तसंलग्नं चतुरंगुलपुष्टं वृत्तं चूर्णेष्टका- दिना कार्यम् । तत् श्लक्ष्णं कृत्वा तत्रांशाः संभवकलाश्चांक्याः । पुनस्तद्भित्ति- समानान्तरे हस्तद्वयान्तरेण अन्या भित्तिः पूर्वतः कार्या । तत्रापि वृत्तं तथैव विधेयम् । उत्तरतः द्वारं स्थापयित्वा सर्वं भित्यन्तरं मुद्रितं कार्यम् । एवमुपरितनप्रदेशेऽपि पट्टिकादिना मुद्रितः कार्यः । भित्तिद्वयस्य दक्षिणकोणद्वयं ऊर्ध्वाधररेखातः कर्णाकारं छित्वा पट्टिकया पिहितं कार्यम् । छिन्नोभयकोण-गतयाम्योत्तररेखायां ऊर्ध्वाधर रेखासमीपे सूक्ष्मं सुषिरं कार्यम्, यथा तद्गता रविप्रभा मध्यान्हे वृत्ते पतति तथा कार्यम् । अनेन प्रकारेण यन्त्रं कृत्वा तदन्तर्गत्वा कपाटं दत्वा मध्याह्ने सुषिरगतां रविप्रभां वृत्ते प्रत्यहं विलोक्य क्रान्त्यक्षयोर्निश्चयः कार्यः । शेषं भित्तियन्त्रवद् ज्ञेयम् । इदं यन्त्रं यथा यथा महद् भवति तथा तथा वेधः सूक्ष्मतरो भवति ।

उपर्युक्तयन्त्रनिर्माणविधिस्तस्य गोलविज्ञानं प्रमाणयति-येनेयमुक्तिः चरितार्था भवति 'करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम्' ।



# मूर्खशिष्यः



-डॉ. अरविन्दकुमारतिवारी

एकस्मिन् विश्श्रुते विद्याकेन्द्रे अनेके सुयोग्याः शिक्षका असंख्यान् शिष्यान् पाठयन्ति स्म। ते वेदं व्याकरणं ज्योतिषं दर्शनं पुराणं सर्वमपि पठन्तो विद्याकेन्द्रस्य कीर्तिं विस्तारयन्ति स्म। एतेष्वेव शिष्येषु चपलमतिः कुमतिरेकः विमतिनामा शिष्य आसीत्। असौ सर्वान् विशिष्टान् गुरुप्रियान् शिष्यान् विलोक्य आत्मना विषीदनुपायान् आविष्करोति स्म। यत्केनोपायेन अयमपि विशिष्टो भूयादिति ।

एकदा शास्त्रार्थः समनुष्ठितो विद्यार्थिनां शास्त्रज्ञानपरीक्षणाय । विद्याकेन्द्रस्य सर्वे गुरवो धौतावेष्टित-कटिप्रदेशाः स्थापितविविधोत्तरीय- स्कन्धाः चन्दनचर्चितभालाः विद्यामूर्तय इव स्वानि स्वानि आसनानि अलमकुर्वन्। तेषां तेषामन्तेवासिनोऽपि स्वगुरुसम्प्रदायपताकां धृत्वा तेषामन्तिके समुपाविशन्। विशाले मञ्चे यथाकालमारब्धं शास्त्रार्थः। सञ्चालकेन सर्वेषां प्रतिभागिनां नामानि समुच्चारितानि । यथानिर्देश कृतसङ्केताः शास्त्रार्थिनः स्वगुरून् प्रणम्य ध्यात्वा सरस्वतीं मातरं सज्जा अभूवन्। एतान् मञ्चस्थान् विलोक्य विमतिर्दर्शकदीर्घायामुपविष्टो दीर्घ निःश्वस्य व्यग्रमनाः सहपाठिनः पश्यन्नासीत्। तस्य मनसि विचारप्रवाहः प्रावृड्वृष्टिप्रवाह इव समजायत। असौ विचारमकरोत्-'कथं नाहमस्मिन् शास्त्रार्थे प्रतिभागं करोमि ? मन्दमतिरहं स्वचापल्येन परजननिन्दनकर्मणा आत्मनः प्रज्ञां दूषयन् पैशुन्यवृत्तिमानस्मि सञ्जातः । इदमेव कारणमस्ति यदहमुपेक्षापात्रमस्मि संवृत्तः। अहं महता श्रमेण विद्योपार्जनं करिष्ये येन अग्रिमे शास्त्रार्थे विजयश्रियं प्राप्नुयाम्।'

अत्रान्तरे शास्त्रार्थ आरब्धः । वैदुष्यसम्पन्नानां विद्यार्थिनां शास्त्रबोधः श्रोतव्य आसीत्। निपीतशास्त्रार्थाः शास्त्रार्थिनः सायं यावत् स्वस्वविषये विद्याप्रदर्शन कृत्वा निर्णयं श्रुत्वा पुरस्कारं सम्प्राप्य गुरून् प्रणमन्तस्ततो निवृत्ताः। किन्तु अयमेको वराको विमतिः सर्वतः पृष्ठे म्लानवदनः, कम्पितस्वरः, असूयावान्, गुणद्वेषी, पिशुनपण्डितः, मन्दं मन्द पदानि दधत् शास्त्रार्थभवनमत्यजत्। आगत्य छात्रावासे स्वमित्रैस्सह परिशीलनं कर्तुमारब्धवान्, यत् कस्य कस्य शास्त्रबोधः कीदृश आसीदिति। अस्य सखा कश्चिद् सुमतिरेनं प्राबोधयत्

'नेयं पद्धतिः समीचीना तव सखे ! त्वं केवलं दोषानेव गणयसि, कदाचिद् गुणानपि गणय। एवं विद्या न समासाद्यते। विद्यार्थि- भिर्गुणिभिर्भाव्यम्। ये विद्यार्थिनो मधुकरीवृत्त्या विद्यामधु अर्जयन्ति त एवं पण्डिता भवन्ति, ये च मक्षिकावृत्त्या तेषु गुणिषु दोषानेव पश्यन्ति ते आजीवनं लब्धविद्या अपि अज्ञानिन एव तिष्ठन्ति। न भारती तेषु प्रसीदति। अतो विहाय दुष्प्रवृत्तिमिमां स्वमतिं शोधय।' इदं श्रुत्वा विमतिरसौ कुपितमानसः प्रकोष्ठं विहाय बहिरागतः। यद्यपि अस्य मित्रेण साधु प्रबोधनं कृतमासीत् तथापि अनेन चिन्तितं यन्मम अपमानः कृतो मित्रेण। स्वभावतः कुटिलो वाममार्गी कृत्रिमहासप्रवीणो मुखमाक्षाल्य पुनरायातः किमपि दर्शनपुस्तकं पश्यन् कालं यापयितुमलगत्। किन्तु दुर्गुणाचार्यो विमतिः सुमतेः मित्रस्य अहितं कर्तुमैच्छत्। यतोहि सत्यमेवेदं प्रोक्तमस्ति-उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये। पयःपानं भुजङ्गानां केवलं विषवर्धद्धनम्।।

अतः परं यथासमयमयं स्वमित्राभ्यां सह भोजनालयं भोजनार्थं प्रस्थितः। तत्रापि अनेन स्वमनोभावो न प्रकटीकृतः। किन्तु विषभरः कृष्णसर्प इव दहन् मन्त्रप्रभावेण समयमपेक्षमाण आसीत्। कृतभोजना एते पुनरागत्य प्रकोष्ठं वज्रासने सुखमनुभूय किमपि पठन्तोऽशेरत। रात्रौ विमतिर्निद्रां न लेभे । आरात्रिकालं केवलमेवमचिन्तयत् येन केनापि षड्यन्त्रेण अस्य पाण्डित्यं दूरीकरिष्यामि। निशान्ते लेशमात्रं निद्रामवाप्य प्रभाते कालनेमिरिव भगवन्तं शिवमर्थ्य स्वाध्यायं च कृत्वा यथाकालं धृतपरिधानः कक्षायामुपस्थितः सर्वतः पृष्ठे निःशङ्ङ्कः समुपाविशत्। यदा आचार्ये समागते सर्वे विद्यार्थिनो यथोचितमुत्थाय अभिवादनकापुस्तदैव षड्यन्त्रकारिणो विमतेर्मनसि दुर्भावाः समुपागतः। अनेन चिन्तितं यत् गुरुपादाभिवन्दनव्याजेन तस्य स्यूते दृश्यमानं दूरभाषयन्त्रमपहृत्य सुमतेः मञ्जूषायां स्थापयिष्यामि। यदा अन्वेषणं भविष्यति तदा अस्य पाण्डित्यं दर्शं दर्शं प्रतीकारप्रतिशोधं करिष्यामि। एवं विचिन्त्य विनतभावेन आचार्यचरणौ स्प्रष्टुं चौर्यवृत्त्या दूरभाषमादाय अस्य रवयन्त्रं मौन विधाय कालान्तरे शीघ्रमेव सुमतेर्मञ्जूषायां प्रार्थनाकाले समस्थापयत्।

प्रार्थनान्ते यदा सर्वे स्वस्थानमुपाविशन् तदा एक आचार्यः स्वयमागत्य अवदत् यत् हे महोदय! अहं दूरभाषं करोमि भवान् कथं नोत्थापयति ? अनेनाचार्येण प्रोक्तं 'नैव आचार्य ! घण्टिका न श्रुता मया। एवं कथयन् आचार्यः स्वस्यूते दूरभाषम् अन्वेष्टुमलगत्। किन्तु कृते प्रयत्ने नैव दूरभाषो लब्धः। तदा सर्वान् विद्यार्थिनो विलोकयन् आचार्य उवाच' अये मम पुत्राः ! यूयमपश्यत क्वचिद् दूरभाषयन्त्रम् ? क्व पतितं नैव स्मरामि। किन्तु आगमनकाले तु आसीदिहैवेति सम्यक् स्मरामि । इदानीं प्रफुल्लवदनो विमतिरचिन्तयत् यत् मनःकामना मे पूर्णा भविष्यति। यदास्य सुमतेस्ताडनं निष्कासनं भविष्यति तदाहमेव सर्वप्रियो विद्यार्थी भविता।

अस्मिन्नेव समये एकेन विद्यार्थिना प्रोक्तम्-'पूज्यगुरुदेव ! अत्रत्यमासनमेव वयं पश्यामः, एकदा भवान् दूरमपसरतु आसनात्। कदाचिदत्रैव पतितं भवेत्। अन्यैरपि एवमेव समर्थितम्। यदा गुरुरवातरदासनात् तदा महता प्रयत्नेन अन्वेषणं कृतं किन्तु दूरभाषयन्त्रं नैव प्राप्तम्। तदा विमतिरत्थाय सुमतिं प्रति पश्यन्नुवाच-' आचार्य! एकदा विद्यार्थिनामस्माकं मञ्जूषा अपि विलोकनीयाः, कदाचिदत्रापि भवितुमर्हति। सम्प्रति विद्यार्थिनो न विश्वासभूमयः। एवं श्रुत्वा ताम्बूलरसफुल्लकपोलयुगल आचार्यो मन्दं संकेतयन् अवदत्-'नैव मम विद्यार्थिन एतादृशा न सन्ति । अहं जानामि । किन्तु एवं विमतेर्वाक्यं श्रुत्वैव सर्वे स्वस्वमंजूषायां दृष्टिनिक्षेपमकुर्वन्।

सुमतिः स्वमंजूषायां दूरभाषयन्त्रं सम्प्राप्य चकितः सन् उच्चस्वरेणावदत्-'गुरो ! मम मंजूषायां कुत आगतमस्ति इति न जानामि। गृहणातु भवान्। सर्वे सविस्मयं तं सुमतिं पश्यन्तः स्थिरदृष्टय अभूवन्।

गुरुरपि दिव्यभालपालिमाकुंचन् अचिन्तयत् यन्नायं सुमतिरीदृशो विद्यार्थी किन्तु अस्य मंजूषायां कुतो दूरभाषः सम्प्राप्यते? दूरभाषमवाप्य आचार्यः न किमपि वक्तुकामः पाठमेव पाठयितुं यदा समारब्धवान् तदा विमतिः स्वस्थानादुत्थाय प्रोवाच-' आचार्य! भवतो दूरभाषयन्त्रमस्य सुमतेमंजूषायां लब्धं, परन्तु भवान् न दण्डयति कथम्? अनेन तु विद्यार्थिनश्चौरा भविष्यन्ति। विमतेरिमं प्रस्तावमाकर्ण्य सुमतिः सविनयमवदत्-' गुरो ! अहमस्मि दण्डनीयो भवता। सत्यमेव विमतिर्वदति।

वृत्तिभाष्यपक्तिग्रन्थिभेदनकुशल आचार्यः पूर्वत एव विद्यार्थिनां स्वभावेन परिचितो वर्तते। अयं विजानाति यत् सुमतिर्हरिश्चन्द्रसमानः सत्यवादी अचौरो विद्यार्थी शास्त्रार्थप्रवीणो वर्तते। नेदं कृत्यमस्य भवितुमर्हति। किन्तु एकदा तं पृच्छेयम् इति विचिन्त्य ससंकोचमना सुमतिमवदत्-'पुत्र! विमतेर्वाक्यं परिशील्य अहं पृच्छामि यत् कुत इदं संजातमिति। सत्यवाक् विद्याविनीतः सुमतिः सविस्मयं समुदतरत्-' हे गुरो ! हे पूज्यपाद! नाहं जानामि । कुतो भवतो दूरभाषयन्तं मम मंजूषायामागतः? अहमस्मि दण्डनीयो दीयतां मे दण्डः। अहं गंगाजलं स्पृष्ट्वापि वक्तुं शक्नोमि यन्नेदं मया चोरितं यन्त्रम्।' इति स्पष्टीकुर्वतः सुमतेनेंत्रयोर श्रुबिन्दव आगतः। दयालुराचार्यो न्यगादीत्। अस्तु त्वमसि निर्दोष इति तु वयं जानीमः किन्तु अयं विमतिः कथं प्रसन्नेन्दुरिव त्वमारो पयितुमुत्सहते। एवमुक्त्वा विमतिं प्रति पश्यन्नाचार्य उवाच-'एकमपि आलुकं सर्वमपि शाकं दूषयति । एकोऽपि मीनः सम्पूर्णमपि तडागं दूषयितुमलं भवति। अहं तु युष्मान् कवीन् कर्तुमिच्छामि स्म अतएव आदौ व्याकरणं पाठयामि। परन्तु अद्यैवं दृष्ट्वा दुःखमनुभवामि। क एष कृतवान् यावन्निर्णयो न भविष्यति न तावदद्य पाठो भविष्यति। गच्छत यूयमिति । एवमुक्त्वा स्वयमेव आचार्यः उपानहौ धृत्वा बुदबुदायमानः शनैश्शनैः प्रस्थितः।

सर्वे विद्यार्थिनो गुरुमनुसरन्तः प्राचलन्, किन्तु सुमतिरासन एवोपविष्टश्चिन्तयन् केन इदं कार्यं मया सह कृतं स्यात् ? कदाचिद् विमतिर्भवेत्। अयमेव दुर्गुणागारोऽस्मासु । ह्यो मया अयं प्रबोधितो रुष्टो भूत्वा

शेषभागःचतुर्थपुटे

# संस्कृतं मानवजीवने सङ्गणकवत् उपयुक्तम् - आचार्यः कुशलदेवः

वार्ताहरः - सचिनशर्मा , मोदीनगरम् , गाजियाबादः, उ.प्र. ।

उत्तरप्रदेशसर्वकारस्य

भाषाविभागाधीनेन उत्तरप्रदेश-संस्कृतसंस्थानेन सञ्चालितानाम्ऑनलाइनसंस्कृत- शिक्षणवर्गाणाम् अन्तर्गतं अस्मिन् मासे बौद्धिकसत्रस्य आयोजनं कृतम्। अस्मिन् मुख्यवक्तृरूपेण गुरुकुलमहाविद्यालयस्य ततारपुरस्य हापुडस्य संस्कृत-प्रवक्ता उत्तरप्रदेश माध्यमिकसंस्कृतशिक्षापरिषद्, लखनऊ इत्यस्य पाठ्यक्रमसमित्याः सदस्यः च आचार्यकुशलदेवः उक्तवान् यत् अद्य संस्कृतं मानवजीवने सङ्गणकवत् उपयुक्तम् अस्ति। यथा




सङ्गणके CPU-प्रधानः संसाधनः विभागः भवति, यथैव सर्वाः स्मृतयः तस्मिन् संगृह्यन्ते, तथैव संस्कृत-अध्येतृणां सङ्गणकवत् अपारस्मृतिशक्तिः भवति । यथैव कुञ्चिकापटलं( कीबोर्ड) विना सङ्गणके किमपि कार्यं न सम्भवति, तथैव संस्कृतग्रन्थैः शास्त्रैः च विना मानवविकासः न भवति । यथा मूषकः(माउस) स्नेहेन संचालितः भवति, तथैव यदा गुरुहस्तः शिष्यस्य शिरसि तिष्ठति ,तदा संस्कृते उपलभ्यमानं सर्वं ज्ञानं सहजतया लभ्यते। यू.पी.एस. अर्थात् अबाधितविद्युत्प्रदा इव संस्कृते दिव्यस्य अध्यात्मस्य च तत्त्वानि सूर्यवत् अस्मान् निरन्तरम् ऊर्जां प्रदास्यन्ति एव। अस्माकं जीवने संस्कृतस्य विकासस्य महत्त्वं वर्तते। यथा भण्डारणकार्यं पुटे वा सञ्चिकायां वा क्रियते, तथैव संस्कृतस्य ज्ञानं सर्वशास्त्रं च अस्माकं जीवनसञ्चिकायां संगृहीतुम् आवश्यकम्। संस्कृतछात्राणां नियोगाय अध्यापनक्षेत्रे कार्यम् अस्ति । उत्तरप्रदेशसंस्कृतसंस्थान द्वारा प्रतियोगिताः कारयित्वा पुरस्कारवितरणसमारोहः भवति। संस्कृतविदुषाम् उत्साह-प्रवर्धनार्थं संस्कृतस्य सम्यक् प्रचारार्थं च संस्कृतसाहित्यस्य, काव्यस्य, विविधशास्त्राणां च कृते विविधाः पुरस्काराः प्रदत्ताः भवन्ति। अस्माभिः मातृभक्त्या संस्कृतभाषायाः अध्ययनं करणीयम्। अस्माभिः पाश्चात्यसंस्कृतेः पृष्ठतः न धावितव्यम् अपितु संस्कृतिविकासं कृत्वा अस्माकं भारतीयधरोहरस्य रक्षणं करणीयम्।

कार्यक्रमस्य आरम्भः निखिलशर्मणः मंगलाचरणेन कविताअग्रवालस्य इत्यस्याः च सरस्वती वंदनाद्वारा कृतः। विदुषी अग्रवालद्वारा संस्थानगीतिका प्रस्तुता।आराधना रावत इत्यनया अतिथिनां परिचयः स्वागतं च कृतम्। कक्षाणाम् अनुभवकथनं स्मृतिगुप्ता, आदित्यरावत, डॉ. राघवेन्द्रमिश्रः, मुकेश लोधी, निशा पाण्डेया डॉ. भागीरथी मिश्रेण च कृतम्। निशा मीना सुमधुरं संस्कृतगीतं प्रस्तुतवती। कुशलतया मञ्चप्रबन्धनं सञ्चालनं च संस्थानप्रशिक्षकः सचिनशर्मणा एवं तकनीकीसहयोगः ओमदत्तद्विवेदी द्वारा कृतः। संस्थानस्य प्रशिक्षकः डॉ०सत्यप्रकाशमिश्रेण सर्वान् समागतान् प्रति आभारं धन्यवादं च ज्ञापितम्। अन्ते प्रदीप तिवारीद्वारा शांतिमन्त्रस्य पाठः कृतः।

अवसरेऽस्मिन् संस्थानस्य निदेशकाः श्रीविनयश्रीवास्तवः, प्रशासनिकअधिकारिणः श्री दिनेश मिश्रः, जगदानंद झा, योजना सर्वेक्षिकाः डॉ० चन्द्रकला शाक्या, प्रशिक्षणप्रमुखः श्रीसुधिष्ठमिश्रः, प्रशिक्षणसमन्वयकाः श्रीधीरजमैठाणी,श्री दिव्यरञ्जन, सुश्री राधाशर्मा च, सर्वे प्रशिक्षार्थिनः, प्रशिक्षकाः अन्ये च सामाजिकसंस्कृतानुरागिजनाः अन्तर्जालद्वारा उपस्थिताः आसन्।

# आत्मरक्षाप्रशिक्षणशिबिरस्य सम्पन्नः

शाहपुराबागः। आत्मरक्षाप्रशिक्षणशिबिरस्य सम्पन्नः राजस्थानशिक्षकप्रशिक्षणमहाविद्यालयः, शाहपुराबागः, आमेररोड्,पुलिसआयुक्तालयः च १९ फरवरीतः २६ फरवरी २०२४ पर्यन्तं सप्तदिवसीयः आत्मरक्षाप्रशिक्षणशिबिरस्य आयोजनं कृतवान् अस्य कार्यक्रमस्य अन्तर्गतं श्रीमती लाडा कुमारी



तथा श्रीमती सुमन कुमारी (निर्भया स्क्वाड) इत्यनेन विभिन्नप्रकारस्य मिश्रितयुद्धकला तथा मुष्टिप्रहारस्य तकनीकाः (बाघमुष्टि, ऊपरी, मध्यं निम्नमुष्टि), रक्षास्थानानि, बलात्कारविरोधी तकनीकाः च विभिन्नेषु सत्रेषु शिक्षिताः आत्मरक्षणम् इत्यादि प्रशिक्षणं दत्तम्। अस्मिन् प्रशिक्षकैः अनेकप्रकारस्य आक्रमणस्थानानां अभ्यासः अपि कृतः । अस्मिन् श्रृङ्खले महिलाप्रशिक्षुणां कर्मचारिणां च कृते विशेषत्रिदिवसीयकार्यशाला अपि आयोजिता, यस्मिन् प्रथमदिने सद्स्पर्श-दुष्टस्पर्श-सम्बद्धा सूचना दत्ता, प्रशिक्षुणां आत्मरक्षणस्य विषये जागरूकाः कर्तुं प्रयत्नाः अपि कृताः . कार्यशालायाः द्वितीयदिने महिलास्वास्थ्यसम्बद्धं चलच्चित्रं प्रदर्शितम्। कार्यशालायाः तृतीयदिने २६ फरवरी २०२४ दिनाङ्के स्वच्छतादिवसस्य आयोजनमपि अभवत्, यस्मिन् कार्यक्रमस्य समन्वयिका डॉ. कविता शर्मा इत्यनेन छात्रछात्राणां सेनेटरीपैडयन्त्रस्य संचालनस्य अभ्यासः कृतः अस्मिन् अवसरे विद्यापीठस्य प्राचार्या डॉ. मनीषा शर्मा अवदत् यत् प्रतिवर्षं विद्यापीठे महिलानां बालिकाछात्राणां च विशेषसन्दर्भेण विशेषक्रियाकलापानाम् आयोजनं भवति।

# भाषाणां संरक्षणेन संस्कृतिनां संरक्षणं भवति-प्रो.मेनन्

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थस्यमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य शोधविभागस्य तत्त्वावधाने अन्ताराष्ट्रियमातृभाषादिवसस्य उपलक्ष्ये विश्वविद्यालयस्य प्रशासनिकभवनस्य अन्नपूर्णाकक्षे 12:30 वादनतः विशिष्टव्याख्यानस्य आयोजनम् अभूत्। कार्यक्रमस्य शुभारंभः सरस्वतीपूजनेन , दीपदीपनेन



वैदिकमङ्गलाचरणेन च अभवत्। कार्यक्रमसंयोजिका डॉ. पूजोपाध्यायः प्रस्तावना, वाचिकस्वागतं च कृतवती। सत्राध्यक्षः मान्यः कुलपतिः प्रो.विजयकुमारसीजीवर्यः आसीत्। तेनोक्तं यत् भाषा विचाराणां समन्वयिका: संस्कृत्याः परिचायिका: च भवन्ति । प्रारंभिकी शिक्षा अस्माकं मातृभाषायाम् एव दातव्या। भाषाणां संरक्षणदृष्ट्या अन्ताराष्ट्रियमातृभाषादिवसः आचर्यते । अस्माकं देशे नाना भाषाः व्यवहारे प्रयुज्यन्ते,भाषन्ते च । बहुभाषाणां ज्ञानेन व्यक्तेः बहुविधविकासः भवति । अतः अधिकाधिकाः भाषाः पठितव्या वक्तव्या च । सम्पूर्णे विश्वस्मिन् सप्तसहस्रभाषाः सन्ति। बह्व्यः लुप्ताः च जाताः । अतः भाषाणां रक्षणं करणीयम्। स्वमातृभाषायां भाषणेन भाषाः सुरक्षिताः भवन्ति। नूतनशिक्षानीतौ 2020 मध्ये भाषोपभाषाणां अधिकप्रयोगे नीतिनिर्धारणं कृतमस्ति। संस्कृतात् सर्वा भाषाः सुरक्षिताः, अतः संस्कृतभाषाभाषीणां जनानां संख्यायां वृद्धिः भवितव्या। कार्यक्रमे विशेषरूपेण उपस्थितेन विश्वविद्यालयस्य श्रीरामानुजसंस्कृत परिसरस्य प्रभारिनिदेशकेन डॉ. तुलसीदासपरोहामहोदयेनापि भाषाणां महत्त्वविषये सभा सम्बोधिता। डॉ. उपेंद्र भार्गवमहोदयेन क्षेत्रीयभाषाणां प्रयोगविषये उद्बोधितम् ।कार्यक्रमे डॉ.अखिलेशकुमारद्विवेदी अन्ये प्राध्यापकाः, छात्राः-शोधच्छात्राः उपस्थिताः आसन् । कल्याणमंत्रेण सह सभा सम्पन्ना अभवत्।






# राजस्थानस्य मुख्यमंत्री भजनलाल शर्मा ओम्-आकृतिमंदिरस्य उद्घाटनं जातम्

पाली। जयपुर स्थितस्य विश्व गुरदीप आश्रमस्य स्वामी महेश्वरानंदः राजस्थानस्य पाली स्थाने भव्य मंदिरं निर्मितवान्। प्रायः 25 वर्षेभ्यः निर्मीयमान मंदिरस्य उद्घाटनं राजस्थानस्य मुख्यमंत्री श्री भजनलाल शर्मा कृतवान् स मंदिरे महादेवस्य अभिषेकं कृत्वा मुख्यमंत्री कथितवान् यत् सनातन धर्मस्य अमृत कालः अयम्। भारतम् अनादि कालतः योगस्य विश्व गुरुरवर्तत। भारतस्य अमृत काले अद्भुतस्य ओम मंदिरस्य उद्घाटनं गौरवास्पदम् स अस्मिन् कार्यक्रमे स्वामी महेश्वरानंदस्य 60 देशेभ्यः 1500 तः अधिकाः वैदेशिकाः अनुयायिनो भागं ग्रहीष्यन्ति।



मंदिरोद्घाटनात्पूर्वं शिखर कलशः, ध्वजदंडः मूर्तिप्रतिष्ठा च विहिता। एतद् ओम मंदिरं 2000 स्तंभेषु संस्थितम्। 25 वर्षेभ्यः अस्य कार्यं चलति। मंदिरमिदं निर्मातुं 500 श्रमिकाः वैदेशिक विशेषज्ञाश्च लग्नाः। 250 एकडतः अपि अधिकभूम्यां पूर्वमेव ओम मंदिरस्य परिसरे विश्वविद्यालयं चिकित्सालयं च अतिरिच्य अनेकविधं सौविध्यमपि विद्यते।

# तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालये कार्यशालायाः आयोजनम्

20.2.2024 तमे दिनाङ्के तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य व्याकरणविभागेन परमलघुमञ्जूषाग्रन्थस्य अध्ययनम् इति विषयम् अधिकृत्य सञ्चालितायाः सप्ताहद्वयव्यापिन्याः कार्यशालायाः समारोपकार्यक्रमः सुसम्पन्नः। उपपञ्चाशा छात्राः शोधच्छात्राः अध्यापकाश्च भागं गृहीतवन्तः । प्रातःकाले प्रवृत्ते समापनसत्रे केरलेभ्यो आमन्त्रिताः कार्यशालायाः आधारपुरुषाः च आचार्याः के. विष्णुनम्बूदिरिमहोदयाः (निदेशकाः, क्षेत्रीयपरिसरः, पय्यनूरु, श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालडी) मुख्यातिथित्वेन उपस्थिताः आसन्। आधुनिककाले अस्य विश्वविद्यालयस्य संस्कृतशास्त्राध्ययने अध्यापने च काशी-पाटलीपुत्रसादृश्यमस्ति इति ते वर्णितवन्तः। कार्यक्रमस्य अध्यक्षत्वेन



उपस्थिताः कुलसचिवाः आचार्याः आ.जे.रमाश्रीमहभागाः पारम्परिकशास्त्राणां साम्प्रतिककाले अध्ययनार्थं छात्रान् प्रेरितवत्यः । विश्वविद्यालयस्य शैक्षिकसङ्कायप्रमुखाः आचार्याः तट्टाविजयराघवाचार्युलुमहाभागाः आन्ध्रप्रदेशस्थां वैयाकरणपरम्परां सुष्ठु प्रतिपादितवन्तः। व्याकरणविभागाध्यक्षाणां प्रो. पङ्कजकुमारव्यासमहोदयानां धन्यवादसमर्पणेन कार्यक्रमस्य अस्य सम्पूर्तिः सञ्जाता।

# मूर्खशिष्यः

तृतीयपुटस्य शेषभागः

प्रतीकारप्रतिशोधनं कृतवान् स्यात् । शिरसि हस्तं धृत्वा निपतदश्रुकणः सुमतिरेकाकी आत्मानं निदोषं साधयितुमुपायं चिन्तयन्नासीत्। समक्षमेव द्वारदेशान्तरितो विमतिर्विहसन् दृष्टो विद्यार्थिभिः। सर्वैरेकस्वरेण प्रोक्तं धृतश्चौरः धृतश्चौरः, एवं श्रुत्वा कृष्णमुखो विमतिः पलायितुमारब्धवान्, किन्तु सर्वे तं वशीकृत्य कक्षे आनीय गुरुवरमानेतुं कचित् प्रेषितवन्तो विद्यार्थिनम्। गुरुरपि अन्यैराचार्यैः साकमागतो विनतशिरसं विमतिमपृच्छत्-'अरे धूर्त ! मम तु तदैव सन्देहो जात आसीत् यदा त्वं प्रणिपत्य चरणयोर्गतवान्, किन्तु तदानीं नेदं चिन्तितम्। किञ्च सुमतिं दोषभाजं दर्शयितुं तव प्रस्तावं श्रुत्वा तु मम निर्णयः पुष्टोऽभूत् यत्त्वमेवासीरस्य दुष्कृत्यस्य नेता। ब्रूहि कथमेवं करोषि ?

आचार्यवरस्य एवं कथितमवधार्य निगृहीतचौर इव विमतिरवदत् 'गुरो! अहमपि सुमतिरिव शास्त्रार्थनिपुणो भवितुमिभलषामि, अयमस्मिन्नेव वयसि लेखकः कविरस्ति विश्रुतः, अहमपि एतत्समानो यशोलब्धुमिच्छामि। असूया मामेव कर्तुमादिशत्। न मम दोषो गुरो !'

आचार्यो मन्दं हसन्नुवाच मूढ! अनेन विधिना विद्यायशो नैव लभ्यते। विद्या तु गुरुशुश्रूषया प्राप्यते । त्वं तु यदि एवमेव कार्यं कुरुषे तदा पापमेवाचरसि। त्वं कुरु परिश्रमं विहाय असूयाम्। दुर्जनसंगं त्यक्त्वा एतादृशं मित्रमणिं सेवस्व निष्कपटम्। कस्यचिन्निन्दया स्वोच्चासनं यल्लभ्यते तत् न स्थायि भवति वत्स! स्वकर्मणा यशो लब्धुं यतस्व । तव विषये बहुधा मां पूर्वमपि विद्यार्थिनः परामृष्टवन्तः किन्तु नव्योऽसीति मत्वा मया नैव त्वं विबोधितः। जानासि तव कुकृत्येन एकस्य सुयोग्यस्य विद्यार्थिनो मनसि कीदृशी वेदना समुत्पन्ना? मम विद्यावितानेः त्वमसि मूर्खशिष्य इति । निर्लज्ज ! यावत्पाठयामि न चित्ते अवधारयसि किन्तु एतादृशं कुकृत्यमानीय विद्याकेन्द्रं दूषयसि। गच्छेतः। वा अये! पादयोरस्य निपत्य क्षमां याचस्व। अयमेव त्वां दण्डयतु इति अहमादिशामि।

कम्पमानतनुर्विमतिः पूर्वजन्मविहितकुकृतप्रभावेण बहुधा सन्मार्गमारूढोऽपि असन्मार्गमेवाश्रयते। अस्य दोषो नास्ति। अत एकमवसरं याचमानः प्रणिपत्य सुमतेश्चरणयोः क्षमामयाचत। गुरुणा निष्कासितो विद्याकेन्द्रात् क्वचिद् गतो मूढजनसंघं विनिर्माय विद्याविहीनः सन् जीवनं यापयति। अधुना क्वचिन्मिलितो दुर्योधनस्यैव श्लोकं श्रावयति-

जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः।
अतो ब्रवीमि-
केनापि देवेन हृदिस्थितेन यथा
नियुक्तोऽस्मि तथा करोमि ॥
त्यक्त्वा त्वं दुर्गुणं सर्वं गुणमाप्नुहि सत्वरम्। अन्यथा विमतिर्भूत्वा मूर्खशिष्यो भविष्यसि ॥
॥ इति ॥

# नवदिल्ली अन्ताराष्ट्रियमातृभाषादिवसमुपलक्ष्य सत्यवती महाविद्यालये समनुष्ठिता सप्तभाषीया कविगोष्ठी



सत्यवती महाविद्यालयस्य मैथिली भोजपुरी अकादम्याश्च संयुक्ततत्त्वावधाने अन्ताराष्ट्रियमातृभाषादिवसमुपलक्ष्य 22-02-2024 दिनाङ्के महाविद्यालयस्य सभागारे एका विशाला सप्तभाषीया कविगोष्ठी छात्राभिप्रेरण-कार्यक्रमश्च आयोजिते, यत्र सप्तभाषाणां कविभिः निजरचनापाठद्वारा श्रोतारो मन्त्रमुग्धीकृताः । कार्यक्रमैस्मिन् मुख्यातिथित्वेन उपस्थितः इन्दिरगान्धिराष्ट्रियकलाकेन्द्रस्य सदस्यसचिवः प्रसिद्धः मनीषी सच्चिदानन्दजोशीवर्यः 'राष्ट्रनिर्माणे नूतनशिक्षानीतौ च मातृभाषाणां महत्ता' इति विषये नैजं ज्ञानगम्भीरं व्याख्यानं प्रास्तौत। अनेन प्रोदितं यत् साहित्यमेव आदर्शसमाजस्य आधारशिला वर्तते। विशिष्टातिथित्वेन वक्तृत्वेन चोपस्थिता दिल्ली हिन्दीसाहित्यसम्मेलनस्य अध्यक्षा, आध्यात्मग्रन्थलेखिका च श्रीमती इन्दिरा मोहनवर्या विविधैः उदाहरणैः जीवने स्वस्यविकासाय मातृभाषायाः महत्वं प्रत्यपादयत। सत्यवती महाविद्यालयस्य अध्यक्षः प्रख्यातः संस्कृतविद्वान् आचार्यः दयाशङ्कर तिवारी अपि स्वागत-भाषणपुरस्सरं सर्वान् छात्रान् अधिकाधिकं सम्भाषणसमये मातृभाषाप्रयोगार्थं प्रैरयत्। अस्मिन् अवसरे हिन्दीभाषीयः कविः प्रोफेसर् हरीश अरोडा हिन्द्यां कवितां प्रस्तूय सर्वान् व्यमोहयत्। समवाप्तसाहित्याकादेमीयुवपुरस्कारः संस्कृतकविः डॉ. युवराजः भट्टराई भक्तिपरां, समसामयिकीं, शृङ्गारविषयिणीं च कवितात्रयीं प्रस्तूय सर्वान् श्रोतृजनान् विमुग्धीकृतवान्। वरिष्ठा कवयित्री, बहुभाषाकोविदा, हिन्दीमराठीभाषायोः परमविदुषी च डॉ. कीर्तिकालेवर्या मराठी-भाषायां हिन्दीभाषायां राजस्थानीभाषायां च निजरचनाः प्रस्तुतवती। कविः दिनेश शर्मा हरियाणवीभाषायां मातृभाषायाः महत्त्वं सुन्दररीत्या चित्रितवान्। पञ्जाबीभाषायाः कवयित्री जसविन्दर कौरबिन्द्रा महोदया मार्मिकीं कवितां श्रावितवती। लोकप्रियः भोजपुरीभाषीयः कविः विनयकुमारशुक्लः 'विनम्रः' निजकविताभिः सर्वान् उपस्थितान् जनान् विमोहितवान्। मैथिलीकवियित्री आभाझा महोदया शृङ्गारकवितां प्रस्तूय श्रोतृजनानां भूरिप्रशंसाः समार्जयत्। कार्यक्रमस्य सफलसञ्चालनं सत्यवती महाविद्यालयस्य हिन्दीविषयस्य प्राध्यापिका प्रोफेसर रचना विमलवर्या समभालयत्। कार्यक्रमस्य अध्यक्षता महाविद्यालयस्यैव प्राचार्यया प्रो. अञ्जूसेठमहोदयया विहिता। अस्मिन् अवसरे कविभ्यः अङ्गवस्त्रं प्रदाय सम्माननम् अपि कृतम्। अस्मिन् कार्यक्रमे महाविद्यालयस्य पारेशतं विद्यार्थिनः उपस्थिताः अवर्तन्त।


KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY,
RAMTEK, DIST. NAGPUR, MAHARASHTRA

राष्ट्रहिताय संस्कृतम्

Centre for Distance and Online Education

Admission Open

(Approved by UGC-DEB)

PROGRAMMES (2024)

For Session January 2024

Choice Based Credit System

NEP - 2020

| Sr.No | Name of Programmes | Duration | Eligibility |
|---|---|---|---|
| 01 | M.A. (Sanskrit) | 02 Years | Any Graduate |
| 02 | M.A. (Yogashastra) | 02 Years | |
| 03 | B.A. (Sanskrit) | 03 Years | HSSC/ 12th |
| 04 | B.A. (Yogashastra) | 03 Years | |
| 05 | Diploma in Sanskrit Agam | 01 Year | |
| 06 | Diploma in Yoga Application | 01 Year | |
| 07 | Diploma in Early Childhood Care and Education | 01 Year | |
| 08 | Diploma in Sanskrit Journalism & Mass Communication | 01 Year | |
| 09 | Diploma in Paurohitya | 01 Year | |
| 10 | Diploma in Karmakanda | 01 Year | |
| 11 | Diploma in Comparative Literature | 01 Year | |
| 12 | Diploma in Upanishads | 01 Year | |
| 13 | Diploma in Ayurvedic Panchkarma | 02 Years | |
| 14 | Diploma in Yoga Naturopathy and Dietetics | 02 Years | |
| 15 | Diploma in Ayurvedic Massage & Panchakarma Technician | 01 Year | |
| 16 | Diploma in Keertanshastra | 01 Year | |
| 17 | Diploma in Fashion Designing | 02 Years | |
| 18 | Diploma in Vastushastra | 01 Year | |
| 19 | Diploma in Interior Designing | 02 Years | |

| Sr.No | Name of Programmes | Duration | Eligibility |
|---|---|---|---|
| 20 | Diploma in Jyotish | 01 Year | HSSC/ 12th |
| 21 | Diploma in Vedic Mathematics | 01 Year | |
| 22 | Diploma in Kautilya's Policy in Public Administration | 01 Year | |
| 23 | Diploma in Library & Information Science | 01 Year | |
| 24 | Diploma in Indian Philosophy | 01 Year | |
| 25 | Certificate in Sanskrit Writing | 6 Months | SSC/ 10th |
| 26 | Certificate in Spoken Sanskrit | 6 Months | |
| 27 | Certificate in Bhagavad Geeta | 6 Months | |
| 28 | Certificate in Jyotish | 6 Months | |
| 29 | Certificate in Vastu | 6 Months | |
| 30 | Certificate in Nation Building Through Arthashastra | 3 Months | |
| 31 | Certificate in Sanskrit Literature | 6 Months | |
| 32 | Certificate in Advaita Vedanta | 3 Months | |
| 33 | Certificate Course in Ayurveda | 13 Months | |
| 34 | Certificate in Vedic Mathematics | 6 Months | |
| 35 | Certificate in Computer Application | 6 Months | |
| 36 | Foundation Course in Yoga Deeksha | 1 Month | |
| 37 | Foundation Course in Spoken Sanskrit | 1 Month | |
| 38 | Yoga Setu | 1 Month | |

Contact us
Director - Dr. Anil Kumar Dubey
Admin - 9607991660
Email - odl@kksu.org
Website - kksanskrituni.digitaluniversity.ac

Please scan the QR code for the admission link.



Prof. Hareram Tripathi
Hon'ble Vice Chancellor
KKSU, Ramtek

| | | | |
|---|---|---|---|
| Ms. Shrivarda Malge | Assistant Professor | (9607991664) | shrivarda@kksu.org |
| Ms. Renushree Bansod | Assistant Professor | (9607991663) | renushree@kksu.org |
| Mr. Krunal Mahajan | Assistant Professor | (9209250555) | krunalm@kksu.org |
| Mr. Ankit Mishra | Assistant Professor | (8750999441) | ankit.krish7@gmail.com |
| Dr. Vishwa kumar | Assistant Professor | (8650768783) | sanskritdoe2017@gmail.com |
| Dr. Mohan Lal Sharma | Assistant Professor | (7503229163) | mohanslbs.sharma91@gmail.com |


प्रथमपुटस्य शेषभागः

## 2022 विश्वभारतीपुरस्काराय

यत्र तत्र परिशील्यन्ते। वाल्मीकिरामीयमिति महाकाव्यमतीव प्रासंगिकं विषयवस्तु प्रतौति। शोधप्रविधिप्रभृतिविषयोपेता अभिनवाः कृतय एतेषां विशिष्टं चिन्तनं प्रकटीकुर्वन्ति। प्रातिभ्यं गुरुवर्याणां भवतां द्विवेदिनामद्वितीयं गीतिवैभवं सूचयति। वस्ततो भवन्तः राष्ट्रभावनाभरिता आचार्याः सन्ति, अतो भवतां रचनासु भारतीया संस्कृतिः, भारतीयाः कवयः वाल्मीकिकालिदासतुलसीदासादयो सदैव दृग्गोचरीभवन्ति। धीमतामेषां द्विवेदिनां राष्ट्रभावः, विमलं चरित्रं, लोकोपकारिणी वाणी एतेषां गीतिकासूपलभ्यन्ते। गमे महाकविभावभूतिवचनं चरित्रार्थयन्ति-वज्रादपि कठोराणि मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति।। मम अनेकानि रचनानि उपकुर्वन्त इमे सम्यक् समीक्षणं कृतवन्तो वर्तन्ते, यथा-- कोरोनाशतकम्, कोरोनाक्रमणणम् इत्यनयोः। उत्तरप्रदेश-संस्कृतसंस्थानेन २०२२ वर्षस्य विश्वभारतीपुरस्काराय इमे चिताः सन्ति। संस्कृतसंवादपरिवारपक्षतः;अमरवाणीकविपरिषदा च हार्दिकमभिनन्दनं विधीयते।

# धन्यमुत्कलसाहित्यं भाषा धन्या तथा लिपिः


प्रो. बनमाली बिश्वालः

नान्दी वाक्
उत्कलीये च साहित्ये भाषायां च तथा लिपौ।
संस्कृतावुत्कलीयायां श्रीजगन्नाथसंस्कृतिः।।
ओडिआ-लिपि-भाषाभ्यां साहित्यं च पुरातनम्।
मौलिकानूदिताभ्यां च क्वचिदाधुनिकं पुनः।।
ओडिआ-भाषा
ओडिआ चोडिशाराज्ये राज्येषु पार्श्ववर्तिषु।
सुरते गुजराते च भाषेयं कथ्यते जनैः।।
प्राचीनैवोडिआ भाषा कालक्रमविभाजिता।
प्राचीन-मध्ययोः पश्चाद्भाषा चाधुनिकी मता।।
भारोपीये च भाषैषा परिवारे तु मन्यते।
इण्डो-आर्यन-शाखायां नूत्नायां परिगण्यते।।
प्राकृते मागधीये च वर्गे दक्षिणपूर्वके।
उड्राख्या मागधी भाषा निगद्यते विशेषतः।।
प्रत्नाधुनिकमध्ये तु या च तिष्ठति सेतुवत्।
सा चावहट्टभाषेति भाषाबैज्ञानिकैर्मतम्।।
व्रजवोल्याश्च निष्पन्ना सोवहट्टेति मन्यते।
पुरातनेवहट्टे च शिशुवेदः प्रसिद्ध्यति।।
वरूते दासो जगन्नाथः कथाः भागवतस्य वै।
प्राकृतायां च भाषायां भाषैव या निगद्यते।।
ओडिआ-लिपिः
ब्राह्मीलिपिसमुत्पन्ना लिपयो भारतस्य ताः।
लिपीयमुत्कलस्यापि तथोभिमन्यते क्वचित्।।
गोलाकारश्च लिप्यास्तु वैशिष्ट्यं नात्र संशयः।
लेखन्या तालपत्रे च लिख्यते चेति कारणात्।।
ओडिआ-साहित्यम्
भाषा-लिप्योः यदोत्पत्तिरुत्कले समजायत।
तदारभ्य च साहित्यं नानाविधं विरच्यते।।
नानाविधं च साहित्यं कविभिरत्र निर्मितम्।
प्राचीनाधुनिकास्सर्वाः विधाश्चात्र समुन्नताः।।
चर्याणां गीतिका नैकाश्चर्यापदे प्रकाशिताः।
बौद्धानां गीतिकास्ताश्च साहित्यमाद्यमौत्कलम्।।
तत्क्रमे मादलापांजी सारलादासभारतम्।
ततश्चण्डीपुराणं च तथा कलशचौतिशा।।
मध्ययुगीनसाहित्ये भक्तिसाहित्यमागतम्।
पंचसखासाहित्यं तु युगेस्मिंश्च प्रसिद्ध्यति।।
दीनकृष्णस्य साहित्यं भक्तेरान्दोलनात्मकम्।
रीतियुगस्य साहित्ये भंजकविः प्रसिद्ध्यति।।
स्वातन्त्र्यपूर्वसाहित्ये मुख्यः फकीरमोहनः।
स्वाधीनोत्तरसाहित्ये गोपीनाथादयः पुनः।।
आधुनिकयुगश्चायं राधानाथात्प्रवर्तते।
प्रतिभारायपर्यन्तं समसामयिकः क्रमः।।
उत्कलीयं च साहित्यं विविधवस्तुमिश्रितम्।
निहिता च विशिष्यात्र विश्व-कल्याणभावना।।
भीमभोईति नाम्ना च सन्थकविः प्रसिद्ध्यति।
जीवनं नरके मेस्तु कल्याणं जगतो भवेत्।।
एवमुत्कलमण्याख्यो गोपबन्धुस्समब्रवीत्।
मृत्तिकायां च देशस्य मम देहो विलीयताम्।।
भरतवाक्यम्
उत्कलजननी धन्या धन्याश्चोत्कलवासिनः।
धन्यमुत्कलसाहित्यं भाषा धन्या तथा लिपिः।।

# तस्मै श्रीरघुनाथाय सभक्तिकं नमोस्तु मे

प्रो. बनमाली बिश्वालः

गंगोदकणिकां पीत्वा रघुनाथस्य दर्शनम्।
पुण्यवान् लभते लोके सौभाग्ये सति केवलम्।।
असकृद्दर्शनं यस्य तोषयति मनस्सदा।
तस्मै श्रीरघुनाथाय सभक्तिकं नमोस्तु मे।।
पृष्ठाच्च गरुडस्यैव श्रीरघुनाथदर्शनम्।
रामतपस्स्थले किंचिद् ध्यानं पुण्येन लभ्यते।।
हनुमानन्पूर्णोथ चन्द्रेश्वरश्च शंकरः।
परिक्रमाक्रमे येषां दर्शनं पुण्यदायकम्।।
भगवत्याश्च गंगायाः दर्शनं स्पर्शपूर्वकम्।
भाग्यभाजो लभन्तेत्र हैमवत्यै नमोस्तु मे।।
वातशीतायते यत्र भागीरथ्याश्च निर्झरैः।
वर्धयन्त्यै हृदानन्दं भागीरथ्यै नमोस्तु मे।।
यत्रैवालकनन्दाया भागीरथ्या च संगमः।
पावन-देवनद्योश्च संगमाय नमोस्तु मे।।
क्रोधश्च नरसिंहस्य यत्र शान्तो ह्यजायत।
कुर्वते लोककल्याणं नृसिंहाय नमोस्तु मे।।
संगमाद्रघुनाथस्य मार्गे श्रीललितेश्वरम्।
दृष्ट्वैव कस्य भक्तस्य मनो न रमते वद।।
समाकर्षति मे चित्तं देवप्रयाग-संगमः।
पंचस्वादि-प्रयागाय सभक्तिकं नमोस्तु मे।।

# चित्रकाव्यम्



घटं भिन्द्यात् पटं छिन्द्यान्न तु कृन्तेत् तरून् नरः।
अस्माकं पितरो ह्येते जीवितं तेष्वधिष्ठितम् ।।

-प्रो.माधवमुरलीधरदेशपाण्डे

नैकानि पातकानि स्युस्सर्वमानवजीवने।
पतिते सत्यपि प्रायः यत्नान्नवोत्थितिर्भवेत्।।

-राधाकृष्णशर्मा प्रख्या

हा दैव हतकं लीला कथं बलवती तव
निपातिता हा सद्यैव त्वया वृक्षस्य दम्पतिः।।
भूम्या: हि वर्धितौ एतौ छायाफलपरार्पणौ।
कृतज्ञौ विनतौ तस्यां प्राणत्यागेऽपि सज्जनौ।।

-डॉ माणिक ठकार

क्षीणाङ्गवृक्षस्तरुणीवियोगात्
पुनः पुनश्चुम्बति भूमिपादौ
लतां मदङ्गी कुरु मेऽम्ब शीघ्रं
त्यजामि नो चेत् तव सम्मुखेऽसून्।।

-आचार्य दामोदर त्रिपाठी

जङ्घालतज्जाङ्गलवृक्षसङ्ग-
यद्रङ्गभङ्ग्यन्तरदृश्यमेतत्।
उन्मूलितोप्येष दिशा वनद्रुः
यदग्रतः कल्पयतेऽल्पकेलिम्।।

-दण्डपाणिराचार्यः

वैशिष्ट्यम् तु हि वृक्षाणां न जानन्ति जनाः खलु।
अस्माकं प्राणदातारं विस्मृत्य जीवनं कथम्?।।
तापाधिक्यं गृहस्यांन्ते वृक्षछेदनकारणम्।
छायाभावेन सर्वत्र उष्णाधिक्यं प्रवर्धते।।
तरवो यत्र छिद्यन्ते तत्र नश्यति काननम्।
नष्टारण्यात् जीवराशिः विनाशं प्रति गच्छति।।
बीजानां वपनं श्रेष्ठं तरूणां वर्धनं तथा।
तैर्लभ्यो प्राणवायुश्च रक्षति जीवसङ्कुलम्।।

-चन्द्रशेखरभट्टः

शशधरकरछाया पादपो नित्यमेव
प्रददतिमनुजेभ्यः वल्कलं च प्रसूनम्।
स्वमधुरफलमूलैतोषयन्ति च सर्वान्
नभवतिपरितुष्टो जीवने ना कदापि ।।
पण्डित हरिश्चन्द्र होता ओड़िशा
प्रददते हि जीवेभ्यो ये वित्रुट्यापि जीवनम्।
प्रत्येकस्यां स्थितौ मित्र पश्य रे कर्म शाखिनाम्।।

-डॉ. देवीसिंहः (चण्डीगढतः)

वृक्षौ शातशरीरधारणकरौ दुर्योगपीडायुतौ।
शैले वासकरैः भयंकरदशा नियन्त्रिता वर्तते।।
दुर्योगेन निवासकर्मनि रताः ह्यावासिकास्सक्रियाः।
शैलः खक्खटकायरूपखचितः ध्वंसात्मको वर्तते।।
सुबोधोऽहम्, असमप्रान्तीयवैदिकगणप्रतिनिधिः
परोपकारायैतस्य वृक्ष स्यापादमस्तकम्।
ईदृशस्यास्य पतनं जगतःपतनं खलु।।

-डॉ के.पुरुषोत्तमाचार्युलु

# उष्णता


डॉ. विपिनकुमारद्विवेदी
पीसीपी इंटर कॉलेज हुसैनगंज, फतेहपुर

उष्णता आगता उष्णता आगता,
स्वेदं नीत्वा उष्णता आगता।
तपति शरीरं सकलं तीव्रम्,
तृषा वर्धते सततं नूनम्।।
रुचिपूर्णं नहि लगति भोजनम्,
शीतलवायुम् इच्छति देहम्।
आम्ररसं सुमधुरं नीत्वा,
उष्णता आगता उष्णता आगता।।
पत्रं नहि तरौ कम्पते,
वायुवेगः नहि वर्धते।
करव्यजनेन न दूरे गच्छति,
अधिकम् अधिकम् सा आगच्छति।।
स्नानेन किंचित् दूरे याति,
पुनः च शीघ्रं प्रत्यायाति।
वांछति मनः स्नानं कर्तुम्,
वारं वारं सरः प्रयाति।।
स्रवति शरीरात् स्वेदः टप् टप्,
वस्त्रं क्लिन्नं भवति सर्वम्।
कार्ये रमते मनः न किंचित्,
उष्णते याहि सम्प्रति शीघ्रम्।।
सूर्यः तपति दिवसे अनिशम्,
शुष्कं शुष्कं सर्वं दृश्यम् ।
कृशकायाः भवन्ति जीवाः,
भ्रमन्ति विकलाः उष्णेन नूनम्।।
जलं सेवते जनः अधिकम्,
वृष्टिं स्मरति वारं वारम्।
मेघं दृष्ट्वा आशां कुरुते,
भविता वृष्टिः सम्प्रति शीघ्रम्।।

# कृष्णात्परं न जाने


डॉ. शशिकान्त तिवारी
शशिधर

लीलाधरेश्वरविभोः फणनृत्यदक्षात्
पूर्णावतारकमलेश्वरदेवदेवात्।
श्रीपद्मनाभभुजगस्थसुमेघवर्णात्
कृष्णात्परं किमपि तत्त्वमहं न जाने।। 01।।
संसारसृष्टिलयरक्षणमूलबीजाद्
भक्तात्मकष्टसुनिवारणकर्मलग्नात्।
विश्वस्य सम्भरणपोषणकार्यलीनात्
कृष्णात्परं किमपि तत्त्वमहं न जाने।। 02।।
नित्यं विरिञ्चिशिवशक्तिसमैस्सुसेव्याद्
आवृद्धबालवनितायुवकादिपूज्याद्।
वेदैश्चशास्त्रसकलैर्नितरां सुवाच्यात्
कृष्णात्परं किमपि तत्त्वमहं न जाने।। 03।।
दिव्यान्मयूरमुकुटान्मुरलीधरात्सद्
गीतामृतेन च जगच्छिवसाधकाच्च।
धेनुप्रसेवकवरात्प्रभुवासुदेवात्
कृष्णात्परं किमपि तत्त्वमहं न जाने।। 04।।
चाणूरकंशरिपुनाशकभक्तपूज्यात्
गोपाङ्गनाहृदयचौरकलाप्रवीणात्।
रासेश्वराद्भगवतो जितकामदेवात्
कृष्णात्परं किमपि तत्त्वमहं न जाने।। 05।।
पञ्चकं वासुदेवस्य यः पठेच्छ्रद्धया हृदा।
तस्मिन्भक्ते जगन्नाथकृपावश्यं भविष्यति।।

# धन्यं वृन्दावनं धाम

धन्या भूमिः परमसुखदा यत्र गोविन्दबालः
कृत्वा लीलां बहुविधशिवां संस्थितो भक्तचित्ते।
दृष्ट्वा दिव्यं प्रियतममहो भक्तसद्भक्तिभावं
जाता वाञ्छा सकलमिह वै जीवनं यापयेयम्।।01।।
हे कृष्ण त्वं भव मयि विभो! सत्यकारुण्ययुक्तः
पूर्णां कुर्या मनसि मम यत्कामना तां सहर्षम्।
जानसि त्वं तव शशिधरः कामयत्यात्मना किम्
अन्तर्यामी निजजनमनोवाञ्छितं वेत्ति नूनम्।।02।।
नो संयाति प्रियशरणतः कोपि ते रिक्तपाणि
र्भक्तोहन्ते शरणसुखदं प्राप्तवानस्मि भाग्याद्।
दाता त्वम्मे तव चरणयोर्याचनामद्य कुर्वे
वाञ्छा ते त्वं निजशशिधरं रोदयेर्मोदयेर्वा।।03।।
देहि त्वं मे मम विभुवर! प्रेमतो वाञ्छितं मे
शास्त्रं मिथ्यां वदति नितरां संवदिष्यामि नो चेत्।
शास्त्रं सत्यं भवतु सकलञ्चौतदर्थं प्रभो! मे
राधासेविन्!भव मयि विभो!शीघ्रमेव प्रसन्नः।।04।।
मोदं दद्या मदनदमन प्रेमवात्सल्यद त्वं
नो यास्यामि प्रभुसुवरद!त्वच्छरण्यान्मुरारे!।
यावन्नैवं भवसि मुदितो लड्डुगोपालदेव!
तावन्नित्यं तव चरणयोर्याचनां वै करिष्ये।।05।।

# ।जयतु मम भारतम् ।। गीतम्


-ईशानतिवारी,
काशी हिन्दू विश्वविद्यालय

नित्यन्नौमि भूमिं , मम भारतमातरम् ।
यस्मिन् वसन्ति सर्वे , जयतु मम भारतम् ।।
गंगा वहति यत्र विमलतरंगा
तापविनाशिनी हरति मोहभंगान्।
पूजिता सदैव, मातृवदहो
जयति जयति गंगा तामहं नौम्यहो ।।
भाषन्ते भाषकाः , शुद्धं सुबोधं
सरलं सरसं च प्रियं संस्कृतं स्वम्।
पूजितं सदैव , देवभाषावदहो
जयति स्वसंस्कृतमाता तामहं नौम्यहो ।।
अहर्निशं यत्र , भवन्ति यज्ञाः
कुर्वन्ति बालकाः सज्जनाः रसज्ञाः।
अस्ति तेषां कृते , अभिनन्दनं
जयन्ति भारतीयास्तानभितो नौम्यहम् ।।
नित्यन्नौमि भूमिं , मम भारतमातरम् ।
यस्मिन् वदन्ति सर्वे , जयतु मम भारतम् ।।

# भारतवर्षस्य भौगोलिकी सीमा

-डॉ. लक्ष्मीकान्तविमलः,
नव देहली

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन फरवरीमासस्य २९ तमे दिनांके सायंकाले ५ वादनतः ७ वादनपर्यन्तम् एका अन्तर्जालीया राष्ट्रिया संगोष्ठी समायोजिताजाता। अस्याः राष्ट्र्याः संगोष्ठ्याः विषयः पण्डितमधुसूदनओझामहोदयप्रणीतस्य इन्द्रविजयस्य प्रथमप्रक्रमस्य सीमाप्रसंगः आसीत्। इन्द्रविजयनामको ग्रन्थः ऐतिहासिकः सुप्रसिद्धः। ग्रन्थेऽस्मिन् भारतवर्षस्य विस्तृता सीमा सुवर्णिता विद्यते। अस्मिन् सीमाप्रसंगे



भारतवर्षस्य द्विधा विभागः अस्ति। पौरस्त्यविभागः प्रथमः पाश्चात्यविभागः द्वितीयः। अस्य विभागस्य प्रमाणभूतानि चतुर्दशप्रमाणानि सुगुम्फितानि सन्ति। आयुज्यमानायां संगोष्ठ्यां चतुर्दशप्रमाणेषु पञ्चप्रमाणानि एव चर्चायाः स्थलानि आसन्।

प्रो. सन्तोषकुमारशुक्लमहोदयाः, आचार्याः, संस्कृतप्राच्यविद्याध्ययनसंस्थानम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली प्रोच्यमानाः आसन् यत् सिन्धुनदीं आधारीकृत्य आधुनिके समये भारतवर्षस्य या सीमा अस्माभिः ज्ञायते वस्तुतः सा सीमा हिन्दुस्थानस्य एव विद्यते। प्राचीने समये भारतवर्ष सिन्धुस्थानेन नाम्ना प्रचलितम् आसीत्। भारतवर्षस्य पश्चिमसीमा पारस्थाननाम्ना विज्ञायते स्म। इदानीं पारस्थानेन ईरानदेशः एव विज्ञायते परन्तु सिन्धुनदीतः लोहितसमुद्रपर्यन्तं सम्पूर्णः प्रदेशः पारस्थानम् एव आसीत्। यथोक्तम् इन्द्रविजये-

**'अद्यत्वे यद् ब्रूवते भारतवर्षस्य सीमानम् ।**
**सिन्धुनदं सा हिन्दुस्थानस्यैतस्य सीमा स्यात् ॥**
**पूर्व्यं भारतवर्षं सिन्धुस्थानाख्या ब्रूवते ।**
**पश्चिमभारतवर्षं पारस्थानं पुरातना ऊचुः ॥**
**निखिलं पारस्थानं सिन्धोरालोहिताम्भोधेः ॥''** इन्द्रविजयः, पृ. २३

मुख्यातिथिरूपेण विराजमानाः काशीहिन्दूविश्वविद्यालयस्य संस्कृत-विद्या-धर्म-विज्ञान-संकायस्य संकायाध्यक्षचराःप्रो. कृष्णकान्तशर्माणःअवोचन् यत् प्राचीनसमये भारतस्य पूर्वसीमा आर्यावर्तनाम्ना प्रसिद्धा आसीत् तथा पश्चिमसीमा आर्यायणशब्देन प्रसिद्धा आसीत्। अधुना आर्यायणः एव ईराननाम्ना विज्ञायते। रक्तसमुद्रात् पूर्वं, सिन्धुनद्याः पश्चिमः, हिन्दमहासागरात् उत्तरम्, आरालसमुद्रात् एवं च कैस्पियन इति नाम्नः समुद्रात् दक्षिणं, यो देशः स 'ओरियन्स' इति नाम्ना ज्ञायते स्म। अनेन व्याख्यानेन प्रतिभाति यत् पश्चिमभारते अपि आर्यस्य निवासस्थानम् आसीत्। यथोक्तमिन्द्रविजयग्रन्थे-

**'आर्यावर्तः शब्दो भवति यथा भारते पूर्व्ये ।**
**पाश्चात्येऽपि तथास्मिन् आर्यायणशब्द ईराने ॥**
**रक्तसमुद्रात्प्रागथ सिन्धुनदात् प्रत्यगर्णवात्तूदक् ।**
**आरालकाश्यपीयजलधिभ्यां दक्षिणान् देशान् ॥**
**प्रागोरियंस नाम्नाऽनार्याः पूर्वे वदन्ति स्म ।**
**तेन च पश्चिमभारतमार्यनिकेतनमिति प्रतीतं नः॥',** तत्रैव

वक्तृरूपेण संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य संस्कृतविद्याविभागस्य सहाचार्याः डॉ. रविशंकरपाण्डेयमहोदयाः सीमाप्रसंगस्य आद्यप्रमाणद्वयं स्वीकृत्य व्याख्यानम् अकुर्वन्। तैःभणितं यत् प्राचीनकाले कान्यकुब्जदेशस्य राजा विश्वामित्रः आसीत्। एकस्मिन् समये स विश्वामित्रः ऋषेः वसिष्ठस्य नन्दिनीं नाम्नीं गाम् अपहर्तुम् मनसि इच्छां कृतवान्। परन्तु सा नन्दिनी नाम्नी गौ विश्वामित्रेण साकं गन्तुं नैच्छत। अतः सा नन्दिनी बारं बारं स्वपादेन भूमिम् अखनत। तस्मिन् समये ऋषिः वसिष्ठः स्वमित्रेण वरुणेन सह संबन्धं संस्थाप्य सहायताम् ऐच्छत। वसिष्ठेन सह वरुणस्य अस्याः मित्रतायाः वर्णनं वेदे समुपलभ्यते। अनेन वैदिकप्रसंगेन भारतवर्षस्य सीमानिरूपणात्मिका व्याख्या सर्वथा नूतना वर्तते विदुषां मध्ये-

**'विश्वामित्रः पूर्वं राजासीत् कान्यकुब्जदेशस्य ।**
**स वसिष्ठस्य कदाचिद्धर्तुं गां नन्दिनीमैच्छत् ॥**
**सा नन्दिनी तु नैच्छत् तं विश्वामित्रमनुगन्तुम् ।**
**क्रोधात्सा बहुवारं खुरतो भूमिं तदा व्यखनत् ॥**
**तत्र वसिष्ठो वरुणादैच्छत् साहाय्यमात्मकुलसुहृदयः ।**
**उक्तं वेदे सख्यं वरुणेन हि तद्वसिष्ठस्य॥',**तत्रैव, पृ. २७

काशीहिन्दूविश्वविद्यालयस्य संस्कृत-विभागस्य सहायकाचार्याःडॉ.ठाकुरशिवलोचनशाण्डिल्यवर्याः सीमाप्रसंगस्य तृतीयं प्रमाणम् ऊररीकृत्य सारगर्भितं व्याख्यानम् अकुर्वन्। तृतीयस्य प्रमाणस्य विषयः अस्ति इन्द्रं वरुणं निमित्तीकृत्य ब्राह्मणवर्गे वाग्युद्धं प्राचलत्। ऋग्वेदस्य उद्धरणाधारेण अयं सीमाप्रसंगः अतीव महत्त्वपूर्णं प्रतिभाति। ठाकुरशिवलोचनवर्याःअवदन् यत् मीमांसामते वेदे इतिहासः न अस्ति। यदि वेदे इतिहासः स्वीक्रीयेत तर्हि वेदस्य अपौरुषेयत्वस्य हानिः सञ्जायते। परन्तु मधुसूदनओझामहोदयस्य प्रधानशिष्यः पण्डितमोतीलालशास्त्रिवर्यः दृढतया प्रतिपादनं कृतवान् यत् वेद इतिहासः अस्ति । वेदे इतिहासस्वीकृतेन वेदस्य अपौरुषेयस्य हानिः नैव जायते। 'सर्वं वेदात् प्रसिध्यति' इति शिष्टप्रमाणेन ज्ञायते। जरथुस्त्रः आसुरधर्मं प्रविष्टवान्। सः इन्द्रस्य महान् निन्दकः आसीत्। इन्द्रस्य निन्दाकारणेन जरथुस्त्रेण साकं विरोधः सञ्जातः। प्राचीने काले बाह्लीकदेशे जरथुस्त्रः उत्पन्नोऽभूत् । स जरथुस्त्रः सौत्रामणियज्ञं सम्पादितवान्। अस्मिन् यज्ञे ब्राह्मणवर्गे परस्परं विरोधः सञ्जातः। ऋजाश्वस्य वशंजः जरदिष्टः ब्राह्मणः आसीत्। परन्तु सः जरदिष्टः विनीतरहितः चासीत्। स जरदिष्टः इन्द्रेण साकं विद्वेषं कृत्वा वरुणस्य प्रशंसकः आसीत्। स आसुरधर्मम् अङ्गीकृतवान्। जरदिष्टः असुरस्य सुरस्य च शब्दस्य अभिनवां व्याख्यां कृतवान् । असुशब्दस्य अर्थः प्राणः अस्ति। यः असून् प्राणान् धारयति स असुरः। असुरः शक्तिशाली आसीत् प्राणशक्तिधारणत्वात्। देवगणाः स्वयं प्रतिप्रादयन्ति यत् 'वयं सुराः स्मः'। सुरशब्दस्य अर्थः प्राणरहितः। अतः देवता शक्तिहीनः दुर्बलः अस्ति। अनेन व्याख्यानेन सीमावर्णनस्य भूमिका ग्रन्थकृद्भिः परिकल्पिता-

**'आसुरधर्मे प्रविशतो जरथुस्त्रस्य देवेन्द्रनिन्दकत्वं विरोध हेतुः।**
**बाह्लीके यो जज्ञे जरथुस्रस्तस्य समये प्राक् ।**
**सौत्रामण्यामिष्टौ ब्राह्मणवृन्दे विरोधोऽभूत् ॥**
**आर्ज्राश्वो जरदष्टिर्ब्राह्मण आसीत् तथाप्ययं धृष्टः।**
**विद्विष्य देवमिन्द्रं वरुणस्तु धर्ममासुरं दधे।**
**येऽसून् प्राणान् दधते तेऽमी असुरा महाप्राणाः।**
**असुरत्वं तु न येषाम् तेऽमी देवाः'सुरा स्म' इत्यूचुः ॥',** तत्रैव, पृ. ३२

इलाहाबादविश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्याःडॉ.विकासशर्ममहोदयाःसीमाप्रसंगस्य चतुर्थं पञ्चमं प्रमाणं स्वीकृत्य स्वकीयं व्याख्यानं प्रदत्तवन्तः। तैः उक्तं यत् ग्रन्थकारः पण्डितओझावर्यः भारतवर्षस्य सीमावर्णनक्रमे पृथिव्याः स्वरूपनिर्धारणं कृतवान् । पृथिवीस्वरूपनिरूपणाय पद्मपुराणतः मत्स्यपुराणतः प्रमाणम् उपस्थापितम् अस्ति। भगवतः नारायणस्य नाभिप्रदेशात् एकम् कमलम् उत्पन्नम्, तद् कमलम् अनेकवर्णयुक्तम् चासीत्, सूर्यसदृशं भासमानं स्वर्णवर्णं चासीत् कमलम्। तस्मिन् स्वर्णमये कमले भगवतो नारायणतो महान् तेजस्वी लोकसृष्टिकर्ता ब्रह्मा चतुर्मुख उत्पन्नोऽभूत्। तद् कमलं एव पृथ्वी आसीत्। इयं पृथ्वी पुष्करात् कमलात् उत्पन्नत्वात् पुष्करसंभवा संजाता-

**'पद्मं नाभ्युद्भवं चौकं समुत्पादितवाँस्ततः ।**
**सहस्रवर्णं विरजं भास्कराभं हिरण्मयम् ॥**
**पद्मे हिरण्मये तस्मिन्नसृजद् भूरि वर्चसम् ।**
**स्रष्टारं सर्वलोकानां ब्रह्माणं सर्वतोमुखम् ॥**
**तच्च पद्मं पुराभूतं पृथिवीरूपमुत्तमम् ।**
**यत्पद्मं सा रसादेवी पृथिवी परिकथ्यते।**
**एवं नारायणस्यार्थे मही पुष्करसंभवा ॥**
**प्रादुर्भावोप्ययं तस्मान्नाम्ना पुष्करसंज्ञितः ॥'**तत्रैव, पृ. ९१

अनेन व्याख्यानेन स्पष्टो भवति यत् पृथ्वी कमलस्वरूपा आसीत्। अस्मिन् कमले चत्वारि पर्णानि आसन्। इयं कमलपत्रस्य वर्णनं मार्कण्डेयपुराणे समुपलभ्यते। चतुर्दिशञ्च भद्राश्ववर्षं भारतवर्षं इत्यादयः सन्ति। अग्रे पुनः भारतवर्षं केतुमालवर्षं भद्राश्ववर्षं कुरुवर्षं नाम चत्वारि कमलपत्राणि देशस्थाननामानि वर्णितानि सन्ति-

**'तदेतत्पार्थिवं पद्मं चतुष्पत्रं मयोदितम् ।**
**भद्राश्वभारताद्यानि पत्राण्यस्य चतुर्दिशम् ।**
**भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा ।**
**पत्राणि लोकपद्मस्य मर्यादा शैलबाह्यतः॥',**तत्रैव, पृ. ९२

संगोष्ठ्याः प्रारम्भः वैदिकमङ्गलाचरणेन सञ्जातः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोध संस्थानस्य शोधाधिकारीडॉ. लक्ष्मीकान्तविमलः कृतवान् । धन्यवादज्ञापनञ्चडॉ. मणिशंकरद्विवेदी अकरोत्। वैदिकशान्तिपाठेन संगोष्ठ्याः समापनं सञ्जातम्। अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालयस्य महाविद्यालयस्य च आचार्याः शोधच्छात्राः विषयानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249**

# द्विदिवसीया राष्ट्रीयभारतीयभाषा-अनुवादकार्यशाला सुसंपन्ना



डॉ.दिनेश चौबे, उज्जयिनी

नवदेहलीस्थभारतसर्वकारस्य शिक्षामन्त्रालयस्याधीना भारतीयभाषासमितिः तथा च उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेन्द्रम् इत्यनयोः संयुक्ततत्त्वाधाने आयोजिता। द्विदिवसीया राष्ट्रीयभारतीयभाषानुवाद कार्यशाला मंगलवासरं सायंकाले सम्पन्ना । माननीयकुलपतिनां आचार्यविजयकुमारमेनन्महोदयानां सानिध्ये नैकाः कार्यक्रमाः विश्वविद्यालयेन आयोज्यन्ते। अस्मिन्नेव क्रमे अस्याः कार्यशालायाः सफलमायोजनम् अभवत्। कार्यशालासंयोजकेन डॉ. अखिलेशकुमारद्विवेदिवर्येण प्रतिवेदनं प्रस्तुवन् उक्तं यत् कार्यशालायामस्यां शताधिकाः विद्यार्थिनः दिनद्वयं यावत् अनुवादस्य सरलपद्धतिविषये प्रशिक्षणं प्राप्तवन्तः। परीक्षणान्ते प्रमाणपत्राणि वितरतानि। सत्राध्यक्षेण प्रो. वाईएसरमेशमहोदयेन विभागाध्यक्षशिक्षाशास्त्रविभागेन केंद्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरेण उक्तम् अस्याः कार्यशालायाः आयोजनेन छात्राः अनुवादस्य प्रक्रिया, आवश्यकता, प्रयोगादिविषये परीचिताः भूत्वा अनुवादकार्येषु प्रवृत्ताः दृश्यन्ते। सरलरीत्या सम्यक् अनुवादः वास्तविकं अर्थं बोधयति। कार्यशालायाः मुख्योद्देश्यम् आसीत्। संस्कृतस्य तथा च अन्यभाषावाक्यानां सम्यग् भावानुवादस्य- शब्दानुवादस्य च प्रयोगज्ञानम्। नवदेहलीस्थकेद्रीय संस्कृतविश्वविद्यालयस्य उपाचार्येण डॉ. पवनव्यासमहोदयेन कथितं यत् उज्जयिन्याः ज्ञानपरंपरा अनादिकालात् विश्वप्रसिद्धा अस्ति ।उज्जयिन्यां सारस्वतसाधना सततं प्रचलति अस्ति। तत्र पाणिनिसंस्कृतविश्वविद्यालयः अनवरतं स्वयोगदानं ददानः शास्त्रसपर्यारतः वर्त्तते।कुलसचिवेन डॉ.दिलीपसोनी महोदयेन उक्तं विश्वविद्यालयः संस्कृतसंवर्धनकार्याय दृढ़संकल्पितः अस्ति। नैकाः कार्ययोजनाः प्रस्ताविताः च सन्ति। कार्यशालायाम् अध्येतारूपेण भागग्रहीतेन श्रीकेतनपौराणिकेन स्वन्‍ुभवकथनं प्रस्तुतम् । कार्यशालायां नैके विद्वान्शः , विधार्थिनः उत्साहेन सम्मिलिताः अभवन् । पाणिनिविश्वविद्यालयस्य आचार्याः संसाधक - विश्लेषकरूपेण कार्यं संपादितवन्तः ।कार्यक्रमस्य संचालनं समन्वयकेन डॉ.दिनेशचौबेमहोदयेन आभारं च वेदविभागाध्यक्षेण डॉ. संकल्पमिश्रवर्येण कृतम।कल्याणमन्त्रेण सह कार्यशाला सम्पन्ना अभवत्।






# गार्गी-वैदिक-कन्या-गुरुकुल कनियान-शामली द्वारा आयोजितः वार्षिकोत्सवः

शामली। तत्र वैदिक सम्मेलन रूपेण महर्षि दयानंद सरस्वत्याः 200तम जन्म जयंती रूपेण हर्षोल्लासपूर्वकं समाचरिता। गुरुकुल प्रांगणे आयोजितस्यास्य कार्याक्रमस्य अध्यक्षताम् आचार्य करण सिंह शास्त्री अकरोत् । कार्यक्रमस्य मुख्यातिथिः श्री जितेंद्र भाटिया (प्रतिनिधिः एमडीएचसमूहः), विशिष्टातिथिषु श्री संजीव आर्यः कुरुक्षेत्रम्, मुख्य वक्तृरूपेण आचार्य योगेश भारद्वाजः, विशिष्ट वक्तृषु डॉ मनीष आर्या,




केंद्रीय विश्वविद्यालय संस्कृत विश्वविद्यालय उत्तराखंडः, सममेव करूणा आर्या योगाचार्या, श्री ओमवीर सिंह चौधरी विशिष्टातिथिः अवर्तत कार्यक्रमे आर्य समाजस्य अन्य स्थानेभ्यः मंत्री प्रधानः सभाधिकारिणोपि उपस्थिताः आसन्। गुरुकुले पठतां ब्रह्मचारिणां अभिभावकाः आसन् । वार्षिकोत्सवे सहस्र संख्यक जनाः प्राप्ताः । गुरुकुल स्य कन्यानां प्रदर्शनं दृष्ट्वा सर्वेषु महान् उत्साहः आसीत्। सर्वैः गुरुकुलाय सहयोगं प्रदातुं घोषणा विहिता। गुरुकुल प्रबंध समिति प्रबंधकः डॉ विकास पवारः संचालनमकरोत्। श्री अनिल कुमारः कोषाध्यक्षः , मा अशोक कुमारः मंचे उपस्थितः । अंग वस्त्रैः स्वागतं समागतानां जातम्। अतिथिभ्यो विशिष्ट वक्तृभ्यो विद्वद्भ्यः स्मृति चिह्नं दत्वा ते सम्मानिताः। वक्तारः स्वविचारान् उपस्थापयन्तःगुरुकुल प्रासंगिकतां विचारितवान् । गुरूकुलपरतया लोकानां ध्यानं आकृष्टम् स आचार्य योगेश भारद्वाजः आर्यहिंदुजागरणविषये कथितवान्। चौधरी ओमवीर सिंहः गुरुकुलानां प्राचीनताविषये स्वविचारान् प्रस्तुतवान। डॉ मनीषा आर्या महर्षि दयानंदस्य विचारान् चर्चितवती। करूणा आर्यापि महिलाशिक्षायाः योग शिक्षायाश्च महत्वपूर्णं प्रतिपादितवान्। अंते आर्य जितेंद्र भाटिया आर्यसमाजाय आत्मनस्समर्पणम् उल्लिखितवान। एमडीएच राजीव गुलाटी कथितवान् यत् एम डी एच अध्यक्षः माननीयः राजीव गुलाटी स्वीयधनस्य निवेशं कृतवान्। वेद प्रचाराय एमडीएचपरतया Rs2,51000/- परिमित राशि चेक द्वारा गुरुकुलाध्यक्षाय आचार्य करण सिंहाय प्रदत्तः स अंते प्रबंधकः डॉ विकास कुमारः समेभ्यः धन्यवादं ज्ञापितवान् । अस्मिन् अवसरे श्री शीशपालः, श्री अजयपालः , श्री राजवीरः , श्री ऋषिपालः, श्री अनिलः, ओमप्रकाशः,मा अशोक कुमारः ,श्री सतेन्द्रः,श्री बालकराम आर्यः,मा गिरवरसिहः,श्री रणसिह तेडा,श्री राजेन्द्र सिंहः रठौडा,श्री रामपालः बडौत , श्री यशवीर आर्यः आदर्शनगला इत्येते उपस्थिताः

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।